International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(3): 308-313
© 2024 IJSR
www.anantaajournal.com
Received: 02-03-2024
Accepted: 05-04-2024

डॉ. एकराजपौडेलः
सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, उत्तर प्रदेश, भारत

Corresponding Author:
डॉ. एकराजपौडेलः
सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, उत्तर प्रदेश, भारत

# व्यक्ताव्यक्तज्ञविज्ञाने शब्दाकाशयोः कारणतानिरूपणम्

डॉ. एकराजपौडेलः

## प्रस्तावना

अव्यक्तानां नित्यतत्त्वानां व्यञ्जकत्वाच्छब्दतत्त्वमव्यक्तविज्ञानस्य कारणम्। व्यक्तानां पृथिव्यादीनां महाभूतानामाश्रयत्वाद् व्यञ्जकत्वाच्चाऽऽकाशतत्त्वं व्यक्तविज्ञानस्य कारणम्। व्यक्ताव्यक्तयोर्ज्ञातुः पुरुषस्य च विज्ञाने व्यक्ताव्यक्तविज्ञानकारणौ शब्दाऽऽकाशौ परमकारणरूपाविति सिद्धम्। अतः प्रोक्तम्-

शब्दब्रह्मात्मनस्तस्य व्यक्ताव्यक्तात्मन: पर:।
ब्रह्मावभाति विततो नानाशक्त्युपबृंहित:॥
(भा.3.12.48) इति। अपि च-
मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम।
तदेतच्छ्रूयतामत्र सम्बन्धे गदतो मम॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥
(वि.पु.6.5.63-64) इति।।

एवं चाकाशतत्त्वं शब्दाश्रयत्वात् पदार्थप्रकाशाश्रयश्च सिद्ध्यति। तद्यथा- व्यक्तानि पृथिव्यप्तेजोवाय्वाकाशरूपाणि पञ्चमहाभूतानि चक्षुरादिबाह्येन्द्रियैर्गृह्यन्ते। तानि च यथा पाषाणखण्डे देवविग्रहस्य सर्वेषामङ्गानां तत्तद्रूपेण दर्शनं ग्रहणं च तथैव आकाशात्मकाश्रये पृथिवीजलाग्निवायूनां दर्शनं ग्रहणं च भवति । आकाशं विना केषामपि पदार्थानां स्थितिर्गतिः प्रवृत्तिश्च भवितुं न शक्नोति। तस्माद् व्यक्तपदार्थानामाश्रयः कारणञ्चाकाशतत्त्वमेव।
अव्यक्तानामतीन्द्रियाणां संवेदनारहितानां च पदार्थानां दर्शनं ग्रहणं चाकाशाश्रितेन वाचकरूपेण स्थितेन व्यक्तशब्देनैव भवति। यद्यपि व्यक्तानां पदार्थानामाश्रय आकाशोऽस्ति तथापि ज्ञानं व्यवहारश्च शब्दद्वारैव भवति।

अत ऋषयः शब्दब्रह्मणैव सर्वं साक्षात्कुर्वन्ति स्म। उक्तञ्च- अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा। ये भावान् वचनं तेषां नानुमानेन बाध्यते॥(वा.प.1.38)। इति।

पदार्थानां परस्परं भेदकः पदार्थ आकाशोऽस्ति। तत्रैव सर्वे पदार्था विभिन्नरूपेण प्रतीयन्ते। तत्र पदार्थानां भेदेऽपि तात्त्विको भेदो ज्ञानं वा शब्दादेव भवति। ब्रह्माण्डे पृथक्-
पृथग्रूपेण स्थितानां पदार्थानां बुद्धौ प्रबोधः ज्ञानं वा शब्दं विना न सम्भवति। अतः पदार्थानां तत्तत्सत्तारूपेण निबन्धिनी शक्तिः शब्दाश्रिता एव। तदाह-

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी।
यन्नेत्रः प्रतिभात्माऽयं भेदरूपः प्रतीयते॥

(वा.प.1.118) इति। अपि च सर्वं बोध्यं वस्तु शब्दाधीनमेवाऽस्ति। अतो ज्ञानं सर्वमपि शब्दभास्यमेव। अतीन्द्रियाणि ज्ञानगम्यानि वस्तूनि तत्त्वानि वा शब्दाश्रितान्येव भवन्ति। उक्तञ्च-
"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।" (वा. प.1.123) इति।

"अर्थप्रवृत्तितत्त्वानां शब्दा एवं निबन्धनम्॥" (वा.प. 1.13) इति च।
तत्र शब्दस्य व्यक्ताव्यक्तज्ञप्रकाशकत्वं निरूप्यते।

आकाशस्थानां पृथिव्यादितत्त्वानां स्वरूपदर्शनं सूर्यचन्द्राग्निमाध्यमेनेन्द्रियैः सम्भवति। किन्तु ये पदार्थाः सूर्यचन्द्राग्निप्रकाशतो विदूरा इन्द्रियैरपि ग्रहितुमशक्यास्तेषां दर्शनं ज्ञानं प्रकाशश्च शब्दमाध्यमेन सम्भवति। अत आह श्रुतिः -
न तत्र सूर्यो भाति न चन्द्रतारकम्। कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वम्। तस्य भासा सर्वमिदं विभाति।। (मु.उप. 2.2.10) इति। आकाशादिमहाभूतानां सिसृक्षायां शब्द एव कारणं भवति। यथा वायकः शाटिकामनुस्मरन् तन्तुभिः शाटिकां निर्माति, तद्वद्वैदिकशब्दानुसारमेव सृष्टिः प्रावर्तत। अत आह-

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्। वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥(म.स्मृ.1. 21) इति । साङ्ख्यदृष्ट्या च शब्दब्रह्माभिन्नात् तन्मात्रात्मकाच्छब्दतत्त्वादेवाकाशस्य तदन्तर्भूतानां वाय्वादीनां च सृष्टिः शब्दतत्त्वस्यैव कारणतां साधयति। अतः प्राह भर्तृहरिः

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत।।
(वा.प. 2.120) इति।

व्यक्ताव्यक्ततत्त्वानां यथा शब्दतत्त्वं कारणं तद्वज्ज्ञातुः पुरुषस्य परमात्मनो वा विज्ञाने शब्दब्रह्मैव कारणं वर्तते। अत आह-
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।। (वि.पु. 6.5.64) इति।
अपि चाव्यक्तमात्मतत्त्वं शब्दब्रह्मणैव व्यक्तं भवति। तत्राऽऽत्मन एव शब्दरूपेणाऽभिव्यक्तेः शब्द आत्माऽभिन्नश्चेति कथयन्ति तत्त्वदर्शिनः। तद्यथा-
अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्। प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते।। (वा. प.1.131) इति। "अथाऽयमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः। व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते। (वा.प.1.112) इति च। किं बहुना चैतन्य एष आत्मैव नित्यज्ञानवान् द्रष्टा साक्षी च सन्नपि श्रोतारं बोधयितुं बद्धजीवं मायाऽन्धकारत उद्धर्तुं परं प्रतिबोधयितुं वा स्वमभिव्यञ्जयन् यद्रूपं गृह्णाति तच्छब्दात्मकमेव वर्तते। निश्चेष्टानि प्राणेन्द्रियमनांसि चेतनसंवलितानि कुर्वन् सूक्ष्मरूपतो मात्रा स्वरो वर्ण इति स्थविष्ठरूपवान् सन्नात्मैव व्यक्तवाग्रेपेण परिणमते। तदाह श्रीमद्भागवते-

"स एष जीवो विवरप्रसूतिः
प्राणेन घोषेण गुहां प्रविष्टः।
मनोमयं सूक्ष्ममुपेत्य रूपं
मात्रा स्वरो वर्ण इति स्थविष्ठः।। (भा. 11.12.17) इति।

अथ व्यक्ताव्यक्तज्ञानां चेष्टा निरूप्यते। जगति या या चेष्टा गतयश्च सर्वा वर्तन्ते ता सर्वा अपि चैतनस्याऽऽत्मन एव चित्प्रकाशरूपाः सन्ति। शब्दे या मात्राऽस्ति सा कालाभिन्ना वर्तते। तदाह महर्षि पाणिनिः - ऊकालोऽज्झ्रस्वदीर्घप्लुतः। (पा.सू.1.2.27) इति। शब्दसम्मिश्र: काल एव परमाणुरूप: सन् जगत् सञ्चालयति। परमाणव एव द्व्यणुकाद्यवयवान्तः सन्तः स्थूलतामुपयान्ति। तत्र मात्रात्मकस्य शब्दाभिन्नकालस्य परमाणुरूपत्वं प्रतिपादयन्नाह श्रीमद्भागवते-

स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्। सतोऽविशेषभुग्यस्तु स कालः परमो महान्॥(भा.3.11.4) इति। यथा चैतन्यं तद्गतिश्चातीन्द्रियं तत्त्वं भवति तथैव परमाणुमात्रकं कालं व्याप्नुवन् परमाणुसज्ञां भजन् कालाभिन्नः परमाणुः एव द्व्यणुकत्रसरेणुकादिरूपेण परस्परमभिसम्बद्धन् जगद्रूपेण भासते। परमाणुनां स्वतन्त्ररूपा परमसम्बद्धा अवस्थैव कालसञ्ज्ञका। द्व्यणुकादिरूपेण सम्बद्धा शब्दात्मिका कालाभिन्ना अवस्थैव जगत्सञ्ज्ञका। परमाणूनां स्वाभाविकी गति: स्वतन्त्राऽवस्थायां चलायमाना भवति। द्व्यणुकादिरूपेण संयुक्तावस्थायां तु परस्परमाकर्षणधर्मिका भवति। परमाणुव एव परस्परं संयुज्यन्तो गुरुत्वाकर्षणधर्माण: सन्तो घनत्वं पीण्डाकारं गुरुत्वं वा लभन्ते। यत्र घनत्वमधिकं भवति स स्थिरो भवति, यत्र लघुता भवति स गतिमान् भवति। अतः पृथिव्यां स्थैर्यं, जले गतिः, अग्नौ तीव्रगतिः, वायौ अतितीव्रगतिः, आकाशे अतितीव्रतमा गतिः समुपलक्ष्यते। अपि च पञ्चमहाभूतेभ्य इन्द्रियाणि पराणि तीव्रगतिकानि वा भवन्ति, इन्द्रियेभ्यः शब्दादिविषया: परा गतिमन्तो वा भवन्ति। ततः परं मनो भवति, ततो बुद्धिः, ततो महत्संयुक्त आत्मा, ततोऽव्यक्ता प्रकृत्यात्मिका माया, ततोऽपि पर: परमपुरुषः श्रीमन्नारायणो भवति। अत उक्तं काठके-

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः।।
महतः परमव्यक्तमव्यक्तात् पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः॥
(कठो. 13.10.11) इति।

एवञ्च श्रीमद्भगवद्गीतायाम्- इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः। मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥ (गी. 3.42) इति।

अतः सर्वा स्पर्शरहिता गतिश्चेष्टा च चैतन्यस्याऽनाहतनादाख्यस्य शब्दाभिन्नस्य परब्रह्मण एव। यत्राऽऽघाते स्पर्शस्यानुभूतिर्भवति तत्र वाय्वग्निजलपृथिवीनां संसर्गो भवति। यत्राऽऽघातं विना मनस इन्द्रियाणामिव गतिः परप्रदेशसंयोगो वा भवति तत्र शब्दाश्रयस्याऽऽकाशस्य सचेतनानां मनोबुद्धिप्रकृतीनां संयोगो भवति। स्पर्शवतां गतितः स्पर्शरहितानां गतिः शीघ्रतरा भवति। अत: पृथिव्यादिप्रकृत्यन्तानां गतिः प्रकृष्टतः प्रकृष्टतमत्वं भजते। ततोऽपि प्रकृतेः परपुरुषस्य गतिश्च परमप्रकृष्टा व्यापकरूपा च भवति।

तत्र प्रतीतिप्रत्ययजनकत्वाच्छब्दाऽऽकाशावेव पदार्थप्रकाशकौ वर्तेते। पृथिवीजलाग्निवायवः प्रतीयमानाः सन्तोऽपि गगनं विना स्वरूपेणावस्थातुं न शक्नुवन्ति। अपि च सर्वेषां रूपवतामाश्रय आकाश एवास्ति। स्थाणुमये काष्ठे देवताया मूर्तिर्न प्रतीयते। यदा स एव स्थाणुस्तक्षादिना सावकाश: क्रियते तदा हस्तपादादिकं तत्रैव प्रतीयन्ते। स्थाणौ हस्तपादादिकानामाधानं तत्र न भवति किन्तु हस्तादिरूपेण प्रतीयमानानामवयवानां बहिःस्थितं द्रव्यं निष्काश्यावकाशप्रदानात् तत्तदवयववत्त्वेन काष्ठे पाषाणे धातौ मण्यादिषु च मूर्तिमत्त्वं समायाति। अतोऽवकाशरूपाऽऽकाशकृतं कार्यं हि मूर्तिरूपम्। तस्माद् सर्वाणि मूर्तिमन्ति वस्तूनि आकाशकृतानि। कार्यरूपाणां वाय्वादीनां शरीराणां कारणमाकाश एव। अत आकाशस्य लक्षणम्- "शब्दाश्रयत्वे सति प्रतीतिजनकत्वमाकाशत्वम्।" इति सिद्ध्यति।

यथा प्रतीतिजनकत्वं लक्षणमाकाशे घटते तद्वत् प्रत्ययजनकत्वं शब्दे घटते। शब्दं विनेन्द्रियादिभिर्गृहीतमपि वस्तु व्यक्तं न भवति। घ्राणरसनाचक्षुस्त्वक्छ्रवणेन्द्रियैर्गन्धरसरूपस्पर्शशब्दा

नामेव ग्रहणं भवति। तत्र श्रवणेन्द्रियो व्यक्ताऽव्यक्तानां शब्दानां ग्राहकोऽस्ति। अव्यक्तशब्द आकाशस्य स्वाभाविको गुणो वर्तते किन्तु व्यक्तशब्दस्य ग्राहक उच्चारणकर्ता च चैतन्य एव भवति। चेतनाऽभिव्यक्तव्यक्तशब्दानामप्याश्रयत्वादाकाशश्चैतन्य स्याऽऽत्मनोऽपि लिङ्गं शरीरं वाह श्रुति:- "आकाशस्तल्लिङ्गात्। (ब्र.सू.) इत्यादिना। अत: शब्दलक्षणं चेत्थं कर्तुं शक्यते - "उच्चारणविषयत्वे सति प्रत्ययजनकत्वं शब्दलक्षणम्।" इति। तथा च महाभाष्यकार:- अथ गौरित्यत्र कः शब्दः ? इत्युक्त्वा द्रव्यक्रियागुणाकृतीर्निरस्य "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्द:।" इत्युक्तवान्। अपि च ध्वनिरपि यदि पदार्थप्रत्यायकश्चेत् सोऽपि शब्द इत्याह - "अथवा प्रतीतप्रदार्थको लोके ध्वनिः शब्दः" (म. भा. पस्पशा.) इति।

ब्रह्माभिन्नत्वेनावस्थितमपि शब्दतत्त्वमाकाशगुणत्वेनावगृह्यते। तत्र प्रतीतपदार्थको लोके ध्वनिः शब्दः (म.भी.पस्पशा.) इतिलक्षणमादाय शब्दस्याऽऽकाशाश्रयत्वं गुणत्वं वा साध्यते। यथाऽऽकाशप्रदेशं विना केषामपि पदार्थानामाकृतिः स्वरूपादिकं न तिष्ठति। तथैव शब्दं विना कस्यापि पदार्थस्याऽऽकृतिस्वरूपादिकानां विभिन्नत्वेन सत्ताऽवबोधो वा न भवति। पृथिव्या अन्तःस्थले यावन्मात्राऽऽकाशस्यास्ति ततोऽधिका मात्रा जले, ततोऽधिका तेजसि ततोऽधिका वायौ वर्तते। अतः पृथिव्या गर्भस्थपदार्थानामाकृते: स्वरूपस्य वा साक्षाद् दर्शनं न भवति। जलान्तःस्थस्य पदार्थस्य स्वरूपादिकं साक्षादनुभूयते। तेजोऽन्तःस्थस्य वाय्वन्तःस्थस्य च स्वरूपं सम्यग् दर्श्यते। अत्र सर्वत्राऽऽकाशस्थितिरेव कारणं भवति। अतः सर्वपदार्थप्रतीतौ आकाश एव कारणमिति सिद्ध्यति।

आकाशस्थपदार्थानां प्रतीतिर्यथारूपेण येन साधनेन वा भवति स शब्दो वर्तते। यदि प्रतीतिः प्रत्ययात्मिका यथार्थज्ञानरूपा वा न स्यात्तर्हि तत्र संशयो भ्रमो विकल्पो वा स्यात्। अतः सम्प्रत्ययपूर्विका ज्ञानपूर्विका वा प्रतीति: सार्थिका भवति। तस्मात् प्रतीतिप्रत्यययोस्तादात्म्यात् समवायाद्वा प्रतीत्याश्रयस्याऽऽकाशस्य प्रत्ययाश्रयः शब्दो गुणरूपः सिध्यति। आकाशं विना पदार्थानां प्रतीतिर्न भवति । शब्दं विना पदार्थानां प्रत्ययो ज्ञानं वा न भवति। अतो महाभारतोक्तम्- अग्निमारुततोयानां क्षितितलस्य च वर्णानां स्वरूपाणामाकृतेर्वा ग्रहणमाकाशादेव भवतीति वचनं युक्तमेव। तदित्थम्-

अग्निमारुततोयानां वर्णा: क्षितितलस्य च।
आकाशादवगृह्यन्ते भिद्यन्तेऽतत्त्वदर्शिभि:॥ (म.भा. शान्तिपर्व. 182.30) इति।

आकाशाभिव्यञ्जकमपि शब्दतत्त्वं ज्ञानाश्रयस्यात्मन: साक्षादभिव्यक्तिरूपमेवास्ति। यथा महाभौतिकाऽऽकाशे महाभूतानां प्रतीति: शब्दद्वारा भवति तथैव परमात्मनोऽपि प्रतीतिश्चिन्मयाऽऽकाशे शब्दब्रह्मरूपवेदद्वारैव भवति। वेदानामोङ्काराभिन्नत्वात्प्रणवात्मक: शब्द: परमात्मन: साक्षात्कारे प्रतीतौ वा कारणं भवति। परमात्मन: प्रतीतिश्चित्ते चिन्मय आकाशे वा भवति। तस्माद् व्यक्ताऽव्यक्तयोर्ज्ञानाश्रयस्यात्मनः परमात्मनो वा कारणं शब्दाऽऽकाशौ निर्विवादरूपेण सिद्ध्यतः। तस्मात् - "तमेव विदित्वाऽतिमृत्युमेति नाऽन्य: पन्था विद्यतेऽयनाय।" (यजुर्वेद 31.18) इत्यादिश्रुत्युक्तं परमात्मन: शब्दब्रह्मज्ञेयत्वकथनं तस्य चिदाकाशाऽभिन्नत्वकथनं च शब्दाकाशयोः परब्रह्माऽभिन्नत्वस्य साधकम्। उक्तञ्च योगवासिष्ठे चिदाकाशस्य, चित्ताकाशस्य आकाशस्य च त्रिविधत्वम्–

चित्ताकाशं चिदाकाशमाकाशं च तृतीयकम्।
द्वाभ्यां शून्यतरं विद्धि चिदाकाशं वरानने।। (यो. वा. सर्ग: 2 उत्पत्तिप्रकरणम् 38) इति। यथा प्रत्यायकस्य शब्दस्याऽऽश्रय आकाशो वर्तते तथैव चैतन्यस्य जीवात्मन: आश्रयश्चित्ताऽऽकाशो वर्तते। एवञ्च परमात्मन आश्रयश्चिदाकाश इति सर्वेषामपि आश्रय आकाश एवास्ति। वस्तुतस्तु सर्वोऽपि प्रपञ्च: परमात्माऽभिन्न एवास्ति। भेदस्तु सम्बन्धकृत एव। परमात्मा सर्वं जगद् व्याप्य तिष्ठति जीवात्मा तु देहं

व्याप्य इति। अतो वक्तुं शक्यते यद्- आकाशतत्त्वं प्रकृतिः शब्दतत्त्वं ब्रह्म इति। चैतन्यस्य परमात्मनः सर्गात्मिकायाः प्रकृतेश्च भेदः क्षणिक एव। वस्तुतस्तु तयोरभेद एव सत्यः। तदाह-

द्वैते यथा नास्ति चिदात्मजीवयो-
स्तथैव भेदोऽस्ति न जीवचित्तयोः।
यथैव भेदोऽस्ति न जीवचित्तयो-
स्तथैव भेदोऽस्ति न चित्तसर्गयोः॥
(योगवासिष्ठे उत्पत्तिप्रकरणे तृतीयार्गे 10) इति।

यद्यपि प्रत्यये बोधे ज्ञाने वा चेतन एव कारणं जनको वा भवति तथापि तत्रोच्चारणविषयत्वाभावात् तल्लक्षणं शब्दतत्त्वे एव सम्भवति। उच्चारणस्यापि चैतन्यकृतत्वात् प्रत्ययस्य बोधस्य ज्ञानस्य वापि चैतन्यमात्रविषयत्वाच्छब्दतत्त्वं शुद्धरूपेण परमात्मनश्चैतन्यस्यैवाभिव्यक्तिः सिद्ध्यति। चिदभिन्नस्य शब्दस्याप्याश्रयश्चिदाकाश एव वर्तते। अत आकाशः शब्दश्च चित्सम्बद्धत्वात् परमात्मन एवाभिव्यञ्जकौ सिद्ध्यतः।

गतिर्नाम चितोऽभिव्यक्तिः। सा चाभिव्यक्तिर्महाभूतेषु पृथक् पृथग्रूपेण विद्यते। तत्र पृथिव्याः गतेरनुभूतिः प्रायोरूपेण नानुभूयते। उच्चावचभूमौ गुरुत्वाकर्षणदर्शनात् भूस्खलने च मृत्पाषाणादीनां क्षरणाच्च पृथ्व्या गतिरनुभूयते। ततः परं जलस्य गतिः साक्षान्नद्यादौ वाष्परूपेण चानुभूयते। ततोऽपि परा गतिरग्नावनुभूयते। ज्वलितोऽग्निर्निरन्तरं चलायमानः सन्नूर्ध्वं गच्छति। ततोऽपि परा गतिर्वायौ वर्तते। अतोऽग्निर्वायुसखः सन्नूर्ध्वं गच्छति। ततोऽपि परा गतिराकाशे वर्तते। अत आकाशाश्रितः शब्दो वाय्वग्निजलपृथ्वीतोऽपि शीघ्रतरं गच्छति। ततोऽपि परा गतिर्मनसः, ततः परा गतिर्बुद्धेः, ततोऽपि परा गतिः प्रकृतेः, ततः परमात्मन इति परमगतिकः परमात्मैव सिध्यति। महाभूतेषु आकाशादिषु प्रत्युत्तरमहाभूतेषु पूर्वमहाभूतानां तेषां गुणस्य च सत्त्वादाकाशस्तद्गुणः शब्दश्च पञ्चमहाभूतेष्वस्ति। वायुः स्पर्शगुणश्च चतुर्महाभूतेषु। अग्नी रूपगुणश्च त्रिमहाभूतेषु। जलं रसगुणश्च द्विमहाभूतेषु। गन्धस्तु पृथिव्यामेवास्ति। केचनाऽऽधुनिका आग्नेयं परमाण्वस्त्रं शब्दतोऽपि दशगुणितगतिमदिति वदन्ति तदयुक्तमेव। यतो हि शब्दतोऽग्नेस्तत्सम्बन्धिनश्च पदार्थस्य शब्दाधिकगतिमत्त्वाभावात्। यदि प्रोच्यते यत्- आकाशे वज्रनिर्घोषे पूर्वं तेजसोऽनुभवो भवति। तत्पश्चाद् ध्वनेः। तस्मात्तेजसः शब्दस्य गतिर्न्यूना इति चेन्न। वज्रनिर्घोषशब्दो हि आकाशे जायते किन्तु आकाशेन नोत्पाद्यते तस्य जननं पृथिवीजलकणयोः संसर्गेण भवति। अतः पञ्चमहाभूतव्यापिनः पृथिवीजलाऽन्तर्गतस्य शब्दस्यैव तत्र जननात् तेजसः सौदामिन्याः प्रकाशो लघुगतिकः समीक्ष्यते। आकाशीयः शब्दः सर्वेषां गतिमतामाधारः सर्वेषामाघातानां जनकः परमगतिकश्चेति सिद्धः।

नन्वाकाशस्य नेत्रविषयत्वान्नील आकाश इति प्रत्यक्षरूपत्वात् कथं रूपरहितस्य वायोरपि सूक्ष्मरूपत्वमिति चेदुच्यते - गन्धतन्मात्रादिनां सङ्घाता एव पृथिव्यादिरूपेण प्रतीयन्ते। तत्र पृथ्वी घ्राणग्राह्यगन्धतन्मात्रजन्या सत्यपि तस्या या प्रतीतिर्भवति तत्र रूपदर्शनं तेजःकृतमेवास्ति। चक्षुः पृथिव्यां स्थितं तेजोऽशं पृथिव्यभिन्नरूपेणानुभवति। वस्तुतो रूपादिकं तत्तदिन्द्रियविषयमेव। आकृत्यवयवसंस्थानादिकं चाकाशकृतमेव। तद्रूपेण भानं बोधो ज्ञानं वा शब्दकृतमेव। तस्माद् –

अग्निमारुततोयानां वर्णाः क्षितितलस्य च।
आकाशादवगृह्यन्ते भिद्यन्तेऽतत्त्वदर्शिभिः॥
(म.भा. शान्तिपर्व. 182.30) इति। अपि च-
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥
(विष्णुपुराण ६/५/६४)। इत्यादिशब्दाकाशयोः सर्वकारणत्वकथनं युक्तमेव।

सङ्केताक्षरसूची

1. श्रीमद्भगवद्गीता (गी०)
2. ब्रह्मसूत्रम् (ब्र.सू.)
3. पाणिनीयसूत्रम् (पा० सू०)
4. श्रीमद्भागवतम् (भा०)
5. विष्णुपुराणम् (वि०पु०)

6. मनुस्मृतिः (म० स्मृ०)
7. महाभाष्यम् (म० भा०)
8. महाभारतम् (म० भा० )
9. वाक्यपदीय ब्रह्मकाण्डम् (वा०प०३०)
10. मुण्डकोपनिषद् (मु० उ०)
11. कठोपनिषद (क० उ०)
12. योगवासिष्ठम् (यो० वा०)
13. शुक्लयजुर्वेदसंहिता (शुक्ल य०)
14. मुण्डकोपनिषद् ( मु० उ०)
15. वाक्यपदीयं ब्रह्मकाण्डम् (वा०प०३०)

सन्दर्भग्रन्थसूची


1. न्यायसूत्रम्- महर्षिगौतमः, सं. डा. नारायण मिश्रा, काशी संस्कृत ग्रंथमाला, 43,
2. विष्णुपुराणम्- महर्षिः पराशरः, हिन्दी अनुवादसहितम्, गीताप्रेस, गोरखपुरम्, वि. सं. 2062
3. श्रीमद्भगवद्गीता- महर्षिवेदव्यासः, मूत्रमात्रम्, गीताप्रेस गोरखपुरम्, वि.सं. २०७४
4. श्रीमद्भागवतमहापुराणम्- महर्षिवेदव्यासः, हिन्दी अनुवादसहितम्, गीताप्रेस, गोरखपुरम्, वि. सन्. 2065
5. महाभारतम् - महर्षिवेदव्यासः, पद्मभूषण डॉ. पं. श्रीपाददामोदर सातवलेकर, भारतमुद्रणालय, बलसार गुजरातम्, वि. सं. २०४१
6. शुक्लयजुर्वेदसंहिता- सं.पं. ईश्वरचन्द्रः, परिमल पब्लिकेशन, नई दिल्ली २००४
7. मनुस्मृतिः- स्वायम्भुवमनुः, कुल्लूकभट्टः, चौखम्बा संस्कृत सीरीज ऑफिसम्,
8. वाक्यपदीयम्- महाराजभर्तृहरिः, सं. पद्मश्री रघुनाथशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, सन् २०५६
9. अमरकोषः- अमरसिंहः, भानूजिदीक्षितस्य रामाश्रमीसुधाटीका, चौखम्बा संस्कृत प्रतिष्ठानम्, नई दिल्ली, ई. सन् २०१७ युधिष्ठिरमीमांसकः, रामलालकपूरट्रस्टम्, हरियाणा,
10. ब्रह्मसूत्रम्- महर्षिबादरायणः, शाङ्करभाष्यम्, अप्पय्यदीक्षितः, अमलानन्दः, वाचस्पतिभिर्व्याख्यातम्, सं. श्रीवासुदेवशर्मा, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, ई.सन् २००२
11. पाणिनीयाष्टाध्यायी- पाणिनिः, काशिका, न्यास-पदमञ्जरी-भावबोधिनी सहिता, सं. डॉ. जयशङ्करलालत्रिपाठी, डॉ. सुधामालवीयश्च, तारा प्रिन्टिंग वर्क्स कामाख्या वाराणसी, सन् २०४२
12. वेदार्थसङ्ग्रहः- श्रीरामानुजाचार्यः, सं. एम् ए. लक्ष्मीताताचार्यः, संस्कृतसंशोधनसंसद्, मैलकोटे, वि. सं. १९९१
13. वैयाकरणभूषणसारः- भट्टोजिदीक्षितः, व्याख्याकार कौण्डभट्टः, सं. डा. आद्यप्रसादमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, वि. सं. २०४५
14. मीमांसा- शावर-भाष्यम् शवरस्वामी, युधिष्ठिरमीमांसकः रामलाल कपुर ट्रस्टम्, हरियाणा, वि. सं. २०४६
15. तर्कसंग्रहः- श्रीमदन्नंभट्टविरचितः, श्रीकृष्णदासात्मजेन गंगाविष्णुना स्वकीय "लक्ष्मीवेंकटेश्वर " मुद्रणागारे मुद्रयित्वा प्रकाशितः, कल्याण-मुंबई, संवत् १९५४, शके १८१९
16. शब्दकल्पद्रूमकोषः- स्यार-राजा-राधाकान्तदेव-वाहादुरेण विरचितः, ऐप्लिकेशननिर्माणम्- श्रुतिझा, प्रो. मदनमोहनझा, Google Play पर ऐप्लिकेशन।
17. न्यायसिद्धान्तमुक्तावली- श्रीविश्वनाथपञ्चाननभट्टाचार्येण विरचिता, काशीनिवासिनिर्मल पं०स्वामिगोविन्दसिंहसाधुकृतार्यभाषाटीकोपना तेनैवसंशोधिता, "श्रीवेङ्कटेश्वर" नाम्नि मुद्रणयन्त्रे मुद्रयित्वा प्रकाशिता, संवत् १९५७, शके १८२२
18. साङ्ख्यकारिका- महामुनीश्वरकृष्णविरचिता, साङ्ख्यतत्त्वकौमुद्या विभूषिता, गयायां स्वाम्यात्मस्वरूपोदासीनैः श्रीरामामुद्रणयन्त्रालये मुद्रयित्वा प्रकाशिता, शके १८५२, संवत् १९८७.
19. वेदान्तसारः,- श्रीसदानन्दविरचितः, भावबोधिनी' संस्कृत-हिन्दीव्याख्योपेतः, व्याख्याकार: मुरादावादस्थ के० जी० के० कालेजप्रोपगुध्यायः श्री रामशरणत्रिपाठी शास्त्री एम. ए., काव्यतीर्थः, चौखम्बा विद्याभवन, वाराणासी-१, १६६५